# कक्षा – IX
## अभ्यासकार्यपत्रकम् – 1
## संकलनात्मक–मूल्यांकनम् –प्रथमम्

समयः होरात्रयम् पूर्णाङ्काः 90

निर्देषाः

(i) प्रष्नपत्रे चत्वारः खण्डाः सन्ति।

खण्डः (क) अपठित–अवबोधनम् – 10 अंकाः

खण्डः (ख) रचनात्मकं कार्यम् – 15 अंकाः

खण्डः (ग) अनुप्रयुक्तव्याकरणम् – 30 अंकाः

खण्डः (घ) पठित–अवबोधनम् – 35 अंकाः

(ii) सर्वे प्रष्नाः अनिवार्याः।

(iii) प्रष्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि ।

(iv) प्रष्नसंख्या अवष्यं लेखनीया।

(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

### खण्डः (क )
### अपठित – अवबोधनम् 12 अंकाः

1. अधोलिखितं अनुच्छेदं पठित्वा निर्देषानुसारं अनुच्छेदाधारितानां प्रष्नानाम् उत्तराणि लिखत–

भारतीयेषु पुराणेषु सर्वदेवमयी गौरित्युद्घोषित मास्ते । माता तु उत्पन्नस्य बालकं त्रिवर्षपर्यन्तमेव दुग्धं पाययति तदनंतरं तु आजीवनं दुग्धं वयं गोरेव लभामहे ।अतएव गौः मानवसमाजस्य धात्री अस्ति ।अथर्ववेदे कथितमस्ति यत् गोमातुः षरीरे सर्वे देवाः निवसन्ति ।आर्यसमाजस्य जनकः स्वामी दयानंदः 'गौ करुणानिधिः' इत्यस्मिन् पुस्तिकायाम् गोमहत्वं व्यञ्ज्ञापयत् । गोदुग्धं अमृतमिव भवति सर्वे जानन्ति एव गोमूत्रे ''नाइड्रोक्स सल्फर, अमोनिया गैस , तॉबा ,लोहा, आदयः तत्वाः भवन्ति । गोमूत्रेण असाध्याः रोगाः नष्यन्ति । पंचगव्यैः (दुग्ध, घृत, दधि, गोमय, गोमूत्र ) बहूनि उपचाराणि भवन्ति ।अद्यापि भारतीयाः सवेषु धार्मिककार्येषु गवामेव दानं कुर्वन्ति अतएव गौः भारतस्य महत्वपूर्णा सम्पत्तिर्वर्तते । तस्याः गोसम्पत्तेः सुरक्षा भारतीयानामस्माकमावश्यकं कर्तव्यं वर्तते ।यतोहि वयं जानीमः एव –''गावो विष्वस्य मातरम् '' ।

**I.** एकपदेन उत्तरत– 1/2X4=2

(i) बहूनि उपचाराणि कैः भवन्ति ?

(ii) 'गौ करुणानिधिः' पुस्तिकायाम् गोमहत्वं कः व्यञ्ज्ञापयत् ?

(iii) असाध्याः रोगाः केन नष्यन्ति ?

(iv) गौः मानवसमाजस्य का अस्ति ?

**II.** पूर्णवाक्येन उत्तरत– 1X2=2

(i) अथर्ववेदे किं कथितम् अस्ति ?

(ii) भारतीयेषु पुराणेषु किम् उद्घोषितमास्ते

**III.** निर्देषानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत – **1X4=4**

(i) गोमूत्रेण असाध्याः रोगाः नष्यन्ति । अस्मिन् वाक्ये विषेषणपदम् किम् ?
(अ) गोमूत्रेण (ब) असाध्याः (स) रोगाः (द) नष्यन्ति

(ii) पुस्तिकायाम् पदे का विभक्तिः ?
(अ) द्वितीया (ब) तृतीया (स) सप्तमी (द) सम्बोधन

(iii) 'निवसन्ति ' इति क्रियापदस्य किं कर्तृपदं अनुच्छेदे प्रयुक्तम् ?
(अ) अथर्ववेदे (ब) गोमातुः (स) षरीरे (द) देवाः

(iv) साध्याः इत्यस्य किं विलोमपदं अनुच्छेदे प्रयुक्तम् ?
(अ) असाध्यायाः (ब) असाध्याः (स) धात्री (द) गोमय,

**Iv.** **अस्य गद्यांषस्य समुचितं षीर्षकं किम् ?** **2**
(अ) 'गौ करुणानिधिः' (ब) गोपालकः (स) गोमहिमा (द) गोमातुः षरीरे

**खण्डः 'ख ' रचनात्मकं कार्यम्** **12 अंकाः**

2. संगणककक्षायां प्रवेषं प्राप्तुं प्रधानाचार्यं प्रति एकं प्रार्थनापत्रं । लिखिते प्रार्थनापत्रे रिक्तस्थानानि उचितपदैः पूरयत्– **1/2X10=5**

देववाणी भवनम्
तिथिः ..............................

1.................................. प्रधानाचार्यवर्याः

2 .............................................................,

सविनयं निवेदयामि यत् अहं 3..................... कक्षायां 90 प्रतिषतअंकान् गृहीत्वा उत्तीर्णः जातः । अधुना अहं 4............................... प्रवेष्टुम् इच्छामि । गणितविषये तु 5............................ सर्वदा षतप्रतिषतम् 6................... गृह्यन्ते । अद्यत्वे सर्वेषु कार्येषु 7........................ अनिवार्यम् । कृपया महम् 8...................... प्रदाय 9................. माम् अनुगृह्णन्तु । 10...................................................

प्रार्थी
अ. ब. स.

मंजूषा –

| |
|---|
| मान्याः, सधन्यवादम्, आदरणीयाः, स्वीकृतिं, अंकाः, संगणककक्षायां, दषम, मया, संगणकम्, भवन्तः |

3. मंजूषायां प्रदत्त–षब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत्– **2X5=10**



मंजूषा –

| |
|---|
| क्रीडन्ति, पादकन्दुकम्, पक्षिणः, आनन्दवर्धकः, षषकः, वृक्षाः, कूर्दति, पठति, वातावरणं, केका, सावधानाः |

**अथवा**

**स्वविद्यालये भवता/भवत्या प्रथमवारं संस्कृतनाटकस्य आयोजनं कृतम् । स्वमनोदषां वर्णयन् पंच वाक्यानि संस्कृतेन मंजूषापदसहायतया लिखतु ।**

**मंजूषा –**

| |
|---|
| मार्गदर्षनेन, चित्तं, व्याकुलं, अभिनयं, अतीव, साधु, आमविष्वासः, जागृतः, करतलध्वनिं, प्रसन्नाः, आदेषेन |

कक्षा – **IX**

## अभ्यासकार्यपत्रकम् – 2

## संकलनात्मक–मूल्यांकनम् –प्रथमम्

**समयः ..................** **पूर्णाङ्काः.....**

**निर्देषाः**

**(ii)** सर्वे प्रष्नाः अनिवार्याः।

**(iii)** प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।

**(iv)** प्रष्नसंख्या अवष्यं लेखनीया।

**(v)** उत्तराणि सस्कृतेन एव लेखनीयानि ।

**खण्डः 'ग ' 'अनुप्रयुक्त व्याकरणम्' 28 अंकाः**

**4. अधोलिखितप्रष्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत । 1x4=4**

(i) 'ज'वर्णस्य उच्चारणस्थानं किम् अस्ति ?

(अ) कण्ठः (ब) दन्ताः

(स) तालुः (द) मूर्धा

(ii) निम्नवर्णेषु कः वर्णः कण्ठ्यः अस्ति ?

(अ) ग् (ब) च्

(स) ट् (द) प्

(iii) प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा रिक्तस्थानं पूरयत ।

कार्यम् = क् + आ + ...... + य् + अ म्

(अ) र् (ब) र

(स) र्य (द) य

(iii) प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा वर्णसंयोजनं कुरु ।

ग् + अ + च् + छ् + अ + स् + इ

(अ) गचछसि (ब) गछचसि

(स) गच्छसी (द) गच्छसि

5. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा संधिं संधिविच्छेदं वा कुरुत् – **1/2X10=5**

(i) सः प्रतिदिनं देवालयं गच्छति ।

(अ) देवा + लयं (ब) देवाः + लयं

(स) देव + लयं (द) देव + आलयं

(ii) रमेषः असत्यं न वदति ।

(अ) रम + ऐषः (ब) रम + एषः

(स) रमा + ईषः (द) रमा + एषः

(iii) अचिरेण + एव कालेन त्वया यषः अर्जितः।

(अ) अचिरेणेव (ब) अचिरेणैव

(स) अचिरेणिव (द) अचिरेणइव

(iv) अतिथीनां गृहे सर्वदा सु + आगतं करणीयम्।

(अ) सु + आगतं (ब) सवागतं
(स) स्व + आगतं (द) स्वा + गतं

(v) सूर्योदये सूर्यार्घ्यं अवष्यं दातव्यम्।
(अ) सूर्यो + दये (ब) सूर्योदय + ऐ
(स) सूर्य + उदये (द) सूर्योदय + अये

(vi) सुधे! कथं त्वं विलम्बादागता ?
(अ) विलम्बा + दागता (ब) विलम्बादाग + ता
(स) विलम्बात + अगता (द) विलम्बात् + आगता

(vii) वने मृगाष्चरन्ति ।
(अ) मृगाः + चरन्ति (ब) मृगाष्च + रन्ति
(स) मृगाष्चरन्त + इ (द) मृगा + ष्चरन्ति

(viii) अहं सम्प्रति जंगमदूरवाण्या वार्तालापे तत् + लीनः अस्मि ।
(अ) तल्लीनः (ब) तत्लीनः
(स) तदलीनः (द) तत्लीनः

(ix) बालस्तत्र पठति ।
(अ) बालस् + तत्र (ब) बालस्त + त्र
(स) बाल + स्तत्र (द) बालः + तत्र

(x) विद्यार्थिनः ब्राह्ममूहूर्ते उत्तिष्ठन्ति ।
(अ) विद्या + र्थिनः (ब) विद्या + अर्थिनः
(स) विद्यार्थि + नः (द) विद्यार् + थीनः

6. अधोलिखितेषु उचितम्विभक्तिपदं चित्वा वाक्यपूर्तिं कुरुत् – **1/2X10=5**

(i) ........................नाम किम् ?
(अ) त्वं (ब) तव
(स) त्वम् (द) तुभ्यम्

(ii) गीता ................................अस्ति ।
(अ) महाभारतस्याः (ब) महाभारतम्
(स) महाभारते (द) महाभारताः

(iii) ......................................अत्र आगच्छ।
(अ) बालकात् (ब) हे बालको
(स) हे बालकः (द) हे बालक!

(iv) ............................ प्रमादं न करणीयम्।
(अ) स्वाध्यायात् (ब) स्वाध्याया
(स) स्वाध्यायेन (द) स्वाध्यायम्

(v) जयतु ............................ वन्दे मातरम्।
(अ) भारतं, (ब) भारतौ
(स) भारतस्य (द) भारते

(vi) सदा वदाम .................................... ?
(अ) संस्कृतौ (ब) संस्कृतस्य
(स) संस्कृत (द) संस्कृतम्

(vii) वने ......................... चरन्ति ।

(अ) मृगौ (ब) मृगः
(स) मृगाः (द) मृगा
(viii) माता गच्छति ।
(अ) मंदिरं (ब) मंदिरः
(स) मंदिरेण (द) मंदिरात्
(ix) आज्ञा हि अविचारणीया ।
(अ) गुरूम् (ब) गुरौ
(स) गुरूः (द) गुरूणाम्
(x) वृक्षात् पतन्ति ।
(अ) पत्राः (ब) पत्राणि
(स) पत्रम् (द) पत्राणाम्

7. अधः प्रदत्तैः उचितैः धातुरूपैः रिक्तस्थानानि पूरयत् – **1/2X10=5**

(i) त्वम् कुत्र ................................... ?
(अ)पठति (ब) पठतः
(स) पठसि (द) पठामि
(ii) ते गुरुजनान् .............................. ।
(अ) पूजयतु (ब) पूजयते
(स) पूज्यते (द) पूज्यन्ते
(iii) बालकः तत्र ....................................।
(अ) गच्छति (ब) गच्छतः
(स) गच्छन्ति (द) गच्छसि
(iv) अमृतः प्रतिदिनं आचार्यप्रणामं ।
(अ) कुर्वन्ति (ब) कुरूथ
(स) कुर्मः (द) करोति
(v) पिता पुत्राय ............................।
(अ) क्रुध्यति (ब) क्रुध्यसि
(स) क्रुध्यन्ति (द) क्रुध्यतः
(vi) अद्य अहं परीक्षां ?
(अ) दास्यामि (ब) दास्यावः
(स) दास्यामः (द) दास्या
(vii) वने रामसीतालक्ष्मणाः ................................ ।
(अ) अवसत (ब) अवसताम
(स) अवसन् (द) अवसम्
(viii) माता जनकेन सह मंदिरं .......................... ।
(अ) अगच्छ (ब) अगच्छन्
(स) अगच्छताम (द) अगच्छत्
(ix) पाचकः भोजनं ................................. ।
(अ) पक्ष्यसि (ब) पक्ष्यति
(स) पक्ष्यामि (द) पक्ष्यन्ति
(x) **रामलक्ष्मणौ** वने ।

(अ) अभ्रमत्(ब) अभ्रमन्
(स) अभ्रमताम् (द) अभ्रमन्ति

8. प्रदत्तविकल्पेभ्यः उचितम् पदं चित्वा रिक्तस्थानानि पूरयत – **1X5=5**

(vi) बालकाः ............................. परितः क्रीडन्ति ?
(अ) वृक्षः (ब) वृक्षम्
(स) वृक्षस्य (द) वृक्षे

(vii) बालकः ..........................सह विद्यालयं गच्छति।
(अ) मित्रस्य (ब) मित्रम्
(स) मित्रात् (द) मित्रेण

(viii) ओउम् ........................ स्वाहा ।
(अ) इन्द्रेन (ब) इन्द्राभिः
(स) इन्द्रस्य (द) इन्द्राय

(ix) मूषकः .................बिभेति ।
(अ) विडालात् (ब) विडालेन
(स) विडालस्य (द) विडाले

(x) तस्मै श्री ............................नमः ।
(अ) गुरुम् (ब) गुरूवे
(स) गुरुवे (द) गुरवे

9. प्रदत्तविकल्पेभ्यः उचितम् पदं चित्वा रिक्तस्थानानि पूरयत –

फ. छात्राः जन्तुषालां गम् + तुमुन् इच्छन्ति ।
(अ) गच्छतुम् (ब) गच्छितुम्
(स) ) गमितुम् (द) ) गन्तुम्

ब. छात्रः नत्वा गुरुं प्रणमति ।
(अ) नम् + क्त्वा (ब) नम् + ल्यप्
(स) नम् + षतृ (द) नम् + क्त

भ. सज्जनाः विचार्य एव कार्यं कुर्वन्ति ।
(अ) वि + चर् + र्य (ब) वि + चर् + य
(स) वि + चार् + ल्यप् (द) वि + चर् + ल्यप्

म. अर्जुनः योद्धुम् उद्यतः अस्ति ।
(अ) युध् + तुमुन् (ब) युध् + उम्
(स) युध् + षतृ (द) युध् + षानच्

य. प्रणवः गम् + क्त्वा फलानि आनयति ।
(अ) गच्छितुम् (ब) गत्वा
(स) ) गच्छित्वा (द) ) गन्तुम्

र. सर्पः उप् + सृ + ल्यप् बालकं पष्यति।
(अ) उपसृत्य (ब) उपसृत्यप्
(स) ) उपसृत (द) ) उपसृल्य

कक्षा – IX

# अभ्यासकार्यपत्रकम् – 3

## संकलनात्मक–मूल्यांकनम् –प्रथमम्

समयः .................. पूर्णाड्.काः.....

निर्देषाः

(ii) सर्वे प्रष्नाः अनिवार्याः।
(iii) प्रष्नानाम् उत्तराणि क्रमेणैव लेखनीयानि ।
(iv) प्रष्नसंख्या अवष्यं लेखनीया।
(v) उत्तराणि सस्कृतेन एव लेखनीयानि ।

### खण्डः- 'घ' (पठित-अवबोधनम्) 35 अङ्काः

10. अधोलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

(अ) गद्यांशः

महर्षेः आरुणेः पुत्रः श्वेतकेतुः आसीत्। द्वादशवर्षीयं तं पुत्रं पिता आरुणिः उवाच– हे श्वेतकेतो! गुरुं प्रति गच्छ अध्ययनार्थं यतः सौम्य! अस्मत्कुलीनः अनधीत्य न भवति इति। सः पुत्रः आचार्यम् उपेत्य यावत् चतुर्विंशतिवर्षः अभवत् तावत् सः सर्वान् वेदान् सार्थान् अधीत्य पितुः सकाशम् आगच्छत्। सः च 'सर्वश्रेष्ठः अहम्' इति मन्यमानः उद्धतस्वभावः अभवत्।

प्रश्नाः:-

I. एकपदेन उत्तरत। ½×2=1

(i) श्वेतकेतुः आचार्यम् उपेत्य किम् अधीतवान्?
(ii) अध्ययनं कृत्वा कः उद्धतस्वभावः अभवत्?

II. पूर्णवाक्येन उत्तरत 2×1=2

(i) श्वेतकेतुः कतिवर्षीयः भूत्वा पितुः सकाशम् आगच्छत्?

III. उचितम् उत्तरम् चित्वा लिखत- 2

(i) 'अधीत्य' इति पदस्य किम् विलोमपदम् गद्यांशे प्रयुक्तम्?

(अ) सार्थान् (ब) अनधीत्य

(स) उपेत्य (द) उद्धतः

(ii) सार्थान् इति पदस्य अनुच्छेदे विशेष्यपदम् किम्?

(अ) ग्रन्थान् (ब) आचार्यान्

(स) सर्वान् (द) वेदान्

(आ) पद्यांशः-

**काष्ठादग्निर्जायते मथ्यमानाद्**
**भूमिस्तोयं खन्यमाना ददाति।**
**सोत्साहानां नास्त्यसाध्यं नराणां**
**मार्गारब्धाः सर्वयत्नाः फलन्ति।।**

प्रश्नाः-

I. एकपदेन उत्तरत। ½×2=1

(i) कीदृशां नराणां कृते किमपि असाध्यं नास्ति?

(ii) कीदृशाः यत्नाः फलन्ति।

II. पूर्णवाक्येन उत्तरत। 2×1=2

अग्निः कीदृशात् काष्ठात् जायते?

III. उचितम् उत्तरम् चित्वा लिखत- 1×2=2

(i) 'फलन्ति' इति क्रियापदस्य कर्तृपदम् किम्?

(अ) अग्निः (ब) भूमिः

(स) मार्गारब्धाः (द) सर्वयत्नाः

(ii) 'जलम्' इति पदस्य पर्यायपदम् पद्यांशे किम् अस्ति?

(अ) अग्निः (ब) भूमिः

(स) मार्गारब्धाः (द) सर्वयत्नाः

(ii) 'जलम्' इति पदस्य पर्यायपदम् पद्यांशे किम् अस्ति?

(अ) तोयम् (ब) वारि

(स) अम्बुदम् (द) सलिलम्

(इ) नाट्यांशः-

**रामः**— मे शापितो न परिरक्षसि चेत् स्वराज्यम्।

**भरतः**— हन्त! अनुत्तरम् अभिहितम्। भवतु, समयतः ते राज्यं परिपालयामि।

**रामः**— वत्स! कः समयः?

**भरतः**— मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुम् इच्छामि।

**रामः**— एवमस्तु।

**भरतः**— आर्य! अन्यमपि वरं हर्तुम् इच्छामि।

**रामः**— वत्स! किमिच्छसि? किमहं ददामि?

**भरतः**— पादोपभुक्ते तव पादुके मे एते प्रयच्छ।

प्रश्नाः-

I. एकपदेन उत्तरत। ½×2=1

(i) कः अन्यम् अपि वरं हर्तुम् इच्छति?

(ii) रामः भरतं किम् परिरक्षितुम् कथयति?

II. पूर्णवाक्येन उत्तरत। 1×2=2

(i) भरतः रामं किं दातुं प्रार्थितवान्।

III. उचितम् उत्तरम् चित्वा लिखत- 2

(i) 'ग्रहीतुम् इति पदस्य किम् विलोमपदम् अत्र अस्ति?

(अ) निक्षिप्तम् (ब) अभिहितम्

(स) प्रतिग्रहीतुम् (द) हर्तुम्

(ii) अस्मिन् नाट्यांशे 'वत्स!' इति सम्बोधनपदम् कस्मै प्रयुक्तम्?

(अ) सीतायै (ब) भरताय

(स) रामाय (द) सुमन्त्राय

11. अधोलिखितश्लोकयोः भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत। ½×8=4

(क) स जातो येन जातेन याति वंशः समुन्नतिम्।
परिवर्तिनि संसारे मृतः को वा न जायते॥

**भावार्थः-** अयम् संसारः (i) .............................. अस्ति। अत्र प्रतिदिनम् अनेके जनाः जायन्ते (ii) .............................. च, परम् यस्य नरस्य (iii) .............................. वंशस्य गौरवं वर्धते, तस्य जन्म एव (iv) .............................. भवति।

(ख) वरमेको गुणी पुत्रो न च मूर्खशतान्यति।
एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि॥

**भावार्थः-** गुणवान् पुत्रः एकः एव सर्वेषु पुत्रेषु (v) .............................. भवति शतानि अपि (vi) .............................. पुत्राः न। यथा एकः एव चन्द्रमा (vii) .............................. नाशयति न तु। (viii) .............................. तारकाणाम् समूहः।

**मञ्जूषा**

| |
|---|
| अन्धकारम्, परिवर्तनशीलः, मूर्खाः, जन्मना, सार्थकम्, श्रेष्ठः, म्रियन्ते, अनेकेषाम् |

12. (क) निम्नलिखित श्लोकयो: अन्वयं मञ्जूषात: समुचितं पदं चित्वा पूरयत। ½×8=4

सुचिरेणापि कालेन यश: किञ्चिन्मयार्जितम्।

अचिरेणैव कालेन भरतेनाद्य सञ्चितम्।।

**अन्वय:-** मया (i) ................................ कालेन अपि किञ्चित् (ii) ................................ अर्जितम्, भरतेन (तु) (iii) ................................ अचिरेण कालेन एव (यश:) (iv) ................................।

(ख) गच्छन् पिपीलको याति योजनानां शतान्यपि।

अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति।।

**अन्वय:-** पिपीलक: अपि (v) ................................ योजनानां शतानि (vi) ................................। अगच्छन् वैनतेय: (vii) ................................ पदम् अपि (viii) ................................ गच्छति।

13. रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत- 1×4=4

(i) वयं <u>पर्युषितम्</u> अन्नम् न खादेम।

(ii) नर: <u>अतिथीनां</u> पूजक: स्यात्।

(iii) <u>भागीरथीतीरे</u> पाटलिपुत्रनामधेयं नगरम् आसीत्।

(iv) महान् भवितुम् <u>सत्संगति:</u> अपेक्षिता।

14. अधोलिखितवाक्यानि कथाक्रमेण संयोज्य लिखत। ½×8=4

(i) बालस्य रक्षायै नियुक्तः नकुलः बालकम् उपसरन्तम् एकं सर्पम् अपश्यत्।

(ii) एकदा राजा श्राद्धार्थम् तं ब्राह्मणम् निमन्त्रितम् अकरोत्।

(iii) श्राद्धकार्यात् प्रतिनिवृत्तः ब्राह्मणः रक्तविलिप्तम् नकुलम् अपश्यत्।

(iv) उज्जयिन्याम् माधवः नाम विप्रः वसति स्म।

(v) गमनात् पूर्वम् ब्राह्मणः स्वपालितम् नकुलम् एकाकिनः बालस्य रक्षार्थम् नियुक्तम् अकरोत्।

(vi) रक्तविलिप्तम् नकुलं दृष्ट्वा ब्राह्मणः "अनेन मे बालकः खादितः" इति मत्वा तम् अमारयत्।

(vii) गृहस्य अन्तः गत्वा, बालकम् स्वस्थम् सर्पम् च हतं दृष्ट्वा सः अतीव दुःखी अभवत्।

(viii) सर्पं मारयन् नकुलः तस्य रक्तेन विलिप्तमुखः जातः।

15. प्रसङ्गानुसारम् रेखाङ्कितपदानां उचितम् अर्थम् चित्वा लिखत– $1 \times 4 = 4$

(i) यदि सत्वरम् न गच्छामि तदा अन्यः कश्चित् श्राद्धार्थं वृतः भवेत्।

| | |
|---|---|
| (अ) शीघ्रम् | (ब) शनैः |
| (स) सततम् | (द) सदैव |

(ii) नक्तम् दधि न भुञ्जीत।

| | |
|---|---|
| (अ) प्रभाते | (ब) सायंकाले |
| (स) मध्याह्ने | (द) रात्रौ |

(iii) पञ्चेन्द्रियद्रव्याणि खं वायुः ज्योतिः आपो भूः इति।

| | |
|---|---|
| (अ) इन्द्रियम् | (ब) सुखम् |
| (स) आकाशः | (द) 'ख' इति वर्णः |

(iv) न दुष्टयानानि आरोहेत्।

| | |
|---|---|
| (अ) विकृतानि वाहनानि | (ब) दुर्जनानाम् वाहनानि |
| (स) दूषितानि स्थानानि | (द) दुष्टैः सह यानानि |